# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – तत्वाचार्य-2** | | **गुणाः - 70** |
| **विषयः –** पुराणेतिहास: | **प्रश्नपत्रम् - 2** | **समयः- 11:30 तः 2:30** |
| **दिनाङ्कः- 10/10/2019** | **संदर्भग्रन्थः –** लिङ्गपुराणम् | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 एकस्य ससन्दर्भं विवेचनं कुरुत। 05**

1. दिवा सृष्टिं विकुरुते रजन्यां प्रलयं विभुः।
   अपचारिकमस्यैतदहोरात्रं न विद्यते ।।
2. भवे भक्तिर्न सन्देहस्तया मुक्तो विमुच्यते।
   अयोग्यस्यापि भगवान् भक्तस्य परमेश्वरः ।।

**प्र-2 एकस्य निबन्धात्मकमुत्तरं लिखत। 10**

1. लिङ्गार्चनविधिं विलिख्य लिङ्गपुराणपरिचयं लिखत।
2. योगसाधनां विलिख्य शिवमहिमानं सविस्तरं यथाग्रन्थं विवेचयत।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 एकस्य ससन्दर्भं विवेचनं कुरुत। 05**

1. आनन्दं ब्रह्मणो विद्वन्न बिभेति कुतश्चन।
   नभेतव्यं तथा तस्माज्ज्ञात्वानन्दं पिनाकिनः ।।
2. दुःखेनाभिप्लुतानां च परमायुः शतं तदा।
   दृश्यन्ते न च दृश्यन्ते वेदाः कलियुगेऽखिलाः ।।

**प्र-4 एकस्य निबन्धात्मकमुत्तरं लिखत। 10**

1. कलिवर्णनं यथाग्रन्थं विधीयताम्।
2. महामृत्युञ्जयमन्त्रमहत्वं यथाग्रन्थं लिखत।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 एकस्य ससंदर्भं विवेचनं कुरुत। 05**

3. अहस्तस्य तु या सृष्टिः रात्रिश्च प्रलयः स्मृतः।
   नाहस्तु विद्यते तस्य न रात्रिरिति धारयेत् ।।
4. चक्षुः स्रोत्रे च जीर्येते तृष्णैका निरूपद्रवा।
   जीर्यन्ति देहिनः सर्वे स्वभावादेव नान्यथा ।।

**प्र-6 एकस्य व्याख्यानात्मकमुत्तरं लिखत । 10**

1. ययातिचरितं यथाग्रन्थं सविस्तरं लिखत ।
2. नवविधसर्गवर्णनं विलिख्य प्राजापत्यसर्गविवेचनं विधीयताम् ।

**प्र-7 एकस्य निबन्धात्मकमुत्तरं लिखत ।** **05**

1. कृष्णं गोमिथुनं दद्यात्पूजयेच्चैव शङ्करम् ।
   भोजयेद् ब्राह्मणांश्चैव यथाविभवविस्तरम् ।।
2. एको न गच्छेदध्यानं बाहुभ्यां नोत्तरेन्नदीम् ।
   नावरोहेत कूपादिं नारोहेदुच्चपादपान् ।।

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-8 एकस्य वर्णनं कुरुत ।** **10**

1. पञ्चाक्षरीविद्यां विवर्ण्य जवपिधानं समहत्वं लिखत ।
2. उपमन्युव्यथां विलिख्य पाशुपतव्रतविवेचनं कुरुत ।

**(पञ्चमान्वितिः - युनिट- 5 )**

**प्र-9 दशानां लघूत्तराणि लिखत ।** **10**

1. द्वे विद्ये के वर्तेते
2. कं प्रणवं विद्धि इति प्रोक्तम्
3. वायुभक्षाः इत्यस्य कोऽर्थः
4. षण्मुखो नाम कः
5. पाशुपतव्रतस्य कः इष्टदेवः
6. परो धर्म कः
7. कुत्र मृतः जनः पुनः जन्तुनां न व्रजति
8. सुदर्शनचक्रं केन कुतः प्राप्तम्
9. विरूपाक्षः कः देवः
10. कः राक्षसः वशिष्ठपुत्रं खादितवान्
11. वशिष्ठमुनेः भार्यायाः नाम किम्
12. शक्रः नाम कः देवः
13. के सूक्ष्मं वदन्ति
14. का देवी वेदमाता स्मृता
15. मैनाकः कस्याः पुत्रः आसीत्